# Ganatantra Divasah

# गणतन्त्र दिवसः

## Document Information

Text title : Ganatantra Divasah

File name : gaNatantradivasaH.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : Kapiladeva Dwivedi

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Rashtragitanjali, Kapiladeva Dwivedi (Ed.)

Acknowledge-Permission: Kapiladeva Dwivedi, Vishvabharati Anusandhan Parishad, Varanasi

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# गणतन्त्र दिवसः

(गीतिका)

गणतन्त्रम् । स्वागतं ते,
गणतन्त्रम् । स्वागतं ते ।
तव गौरवं पुरस्तात्
कीर्तिं श्रियं तनोति ॥ गणतन्त्र० ॥

राष्ट्रोद्भूतावपूर्वां
शक्तिं तनोषि नित्यम् ।
त्वद्ज्ञानमेव ज्योतिः
क्रान्तेश्च दाववह्निः ॥ गण० ॥

संस्मृत्य गौरवं ते
वीराः गुणानुरक्ताः ।
शक्ताः स्वदेश-भक्ताः
शूलिं मुदा श्रितास्ते ॥ गण ॥

त्वं देशभक्ति-भावं
समता क्रियाऽनुरागम् ।
धर्मान्धतां विराम
तनुषे च लोकतन्त्रम् ॥ गण० ॥

कार्ये प्रभाषणे च,
स्वातन्त्र्यमेव लेखे ।
स्वत्वाधिकार-रक्षा
सृष्टं त्वयैव सत्यम् ॥ गण ॥

त्वां प्राप्तुमेव सत्यं
शान्तेश्च क्रान्तिशीलैः ।
आत्माहुति प्रदत्ता

शूलिर्वृता मुदैव ॥ गण० ॥

साम्राज्यवादिनस्ते,
त्वां वीक्ष्य भीतभीता ।
कृत्यैर्निजेजघन्यैः
भस्मान्तभावमाप्ता ॥ गणतन्त्र० ॥

सम्पूर्ण-शक्ति-युक्तं
लब्धं तु भारतीयैः ।
गणतन्त्रमेतदेवं
क्रान्तिं तनोतु लोके ॥ गणतन्त्र० ॥

गुण-गौरवाभिवृद्धिः,
धन-धान्य-सौख्य वृद्धिम् ।
सद्भाव-स्नेह-वृद्धिः
सिद्धिं तनोतु सद्यः ॥ गणतन्त्र० ॥

त्वद्रक्षणेऽनुरक्ताः
भक्त्याऽर्पिताऽऽत्मदेहा ।
क्रान्तेर्दवाग्नि-दूता
कुर्वन्तु देश-स्वर्गम् ॥ गणतन्त्र० ॥

Proofread by Mandar Mali

*Ganatantra Divasah*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*